Gyanshauryam, International Scientific Refereed Research Journal
© 2019 GISRRJ | Volume 2 | Issue 2 | ISSN : 2582-0095

# भागवतधर्मः पाञ्चरात्रञ्च

**डॉ० नवनीता**
**A-21, बैंकमेन्स कॉलोनी,**
**चित्रगुप्तनगर, कंकरबाग**
**पटना, बिहार, भारत**



**सारांशः** - भारतवर्षम् धर्मप्रधानदेशः वर्तते। हिन्दुधर्मे भगवान् विष्णुः पूज्यतमः देवः मन्यते। श्रीकृष्णः विष्णोः अवताररूपेण स्वीकृतः। कालान्तरे यदुकुले वसुदेवपुत्रः वासुदेव श्रीकृष्णः भागवतधर्मे प्रमुखदेवरूपेण प्रसिद्धः जातः। मथुराक्षेत्रे सात्वतजातीयाः वासुदेवधर्मस्यापरनामधेयस्य वैष्णवधर्मस्य प्रचारं-प्रसारं कृतवन्तः। श्रीकृष्णाराधनात् प्ररभ्य एषः सम्प्रदायः कालान्तरे भागवतधर्मे पाञ्चरात्रे च विभक्तः। अस्मन् सम्प्रदाये सर्वेषां मानवानां कृते ईश्वरप्रप्तेः अधिकारः विहितः वर्तते।

**प्रमुख शब्दाः** - भागवतधर्मः, पाञ्चरात्रः, व्यूहः, श्रीकृष्णः, वैष्णवः, सात्वतजातिः, मथुराक्षेत्रे, परमभागवतः, ईश्वरप्राप्तिः।

भारते वर्षे धार्मिकसम्प्रदायेषु वैष्णवधर्मः प्रधानः व्यापकश्च वर्तते। भगवन्तं विष्णुम् आराध्यं मन्यमानाः जनाः वैष्णव इति कथ्यन्ते। अयं धर्मः देवकीपुत्रेण कृष्णेन विशेषतया पोषितः। भगवान् विष्णुः कृष्णस्य कुलदेवः आसीत्। स्वस्य असाधारणस्य व्यक्तित्वस्य हेतोः कृष्णोऽपि शीघ्रमेव देवरूपः परिकल्पितः कालान्तरेण च विष्णोरवताररूपेण गृहीतो जनैः। भगवतः विष्णोः कृष्णस्य च सामञ्जस्यमिदं कृष्णस्य भगवद्रूपेण कल्पने हेतुभूतं जातम्। अत्रैव आनन्दस्य शाश्वतः उत्सः प्रकल्पितः।

पाणिनेः काले (500 ई. पू.) एव कृष्णस्य भगवत्स्वरूपं निरूपितं बभूव। यतः तस्य सूत्रविशेषे **'वासुदेवार्जुनाभ्यां वुन'**[1] इत्यत्र **'सोऽस्य भक्तिः'** इत्यधिकारे दर्शिते ज्ञायते यत् वासुदेवशब्दात् अस्य भक्तिः इत्यस्मिन् अर्थे वुन् प्रत्ययो जायते। तस्य प्रत्ययस्य च **'युवोरनाकौ'**[2] इति सूत्रेण अकादेशः। अतः वासुदेवो भक्तिरस्य इति विग्रहे वासुदेव इति शब्दः सम्पद्यते।

पाणिनिकाले एव कृष्णमूलकः अयं भागवतधर्मः प्रवृत्तः आसीत्, तस्यानुयायिनश्च बहुसंख्यकाः आसन् इति अनुमितं भवति। यस्मिन् वंशे कृष्णः जातः तस्य संज्ञा सात्वतः इति आसीत्। एते सात्वताः एव मूलरूपेण वासुदेवकाः आसन्। शतपथब्राह्मणे[3] ऐतरेयब्राह्मणे एतस्यां दक्षिणस्यां दिशि ये के च सात्वतां राजानो भोज्यायैव ते अभिषिच्यन्ते।[4] च सात्वतजातीनाम् उल्लेखो लभ्यते। इमौ ब्राह्मणग्रन्थौ सात्वत-जातीनां स्थितिः, उत्तरक्षिणयोः उभयोः दिशयोः स्वीकुरुतः। अनेन ज्ञायते यत् मथुराक्षेत्रं परितः इतस्ततः भारते यदुवंशिनः व्यप्ताः अभवन् सात्वत्नाम्ना च ज्ञायन्ते स्म। ते एव कृष्णस्य भगवत्-तत्त्वं प्रसारितवन्तः। वासुदेवधर्मः एव भागवतधर्मरूपेण भारतवर्षे प्रचलितः। अत्र एकैकस्य जनस्य ईश्वरप्राप्तेरधिकारः प्रतिश्रुतः इति विशेषः।[5]

भगवन्तं श्रीकृष्णं प्रति यस्य कस्यापि श्रद्धाभावो समादरो वा वर्तते सः भागवतः इति अभिहितः। सोऽयं शब्दः भक्तस्य पर्यायो जातः। भारतस्य केचन राजानस्तु आत्मानं 'परम् भागवतः' इत्यपि घोषितवन्तः अभिलेखेषु इति विदितमेव पुरातत्त्वविदाम्।

150 ई॰पू॰ कालस्य बेसनगराभिलेखे यूनानीक्षत्रपः हेलियोदोरस इति नामा अपि आत्मानं परमभागवतमिति कथयति। अनेन सूच्यते यत् वासुदेवधर्मः (भागवतधर्मः) विदेशिनः अपि प्रभावितवान्। एते वैदेशिकाः राजानः नूनमेव सात्वतेभ्यः भिन्नाः आसन् किन्तु भगवतः भक्तौ गृहीतादराः।

यूनानदेशीयः यात्रिकः मेगास्थनीजोऽपि कथयति यत् शूरसेन (मथुरा) निवासिनः हरिभक्ता आसन्। तस्य काले (चतुर्थशतके ई॰पू॰) वासुदेवधर्मः भारतस्य मध्यभागे लोकप्रियः आसीत्। किञ्च चतुर्थशतके ईसवीये उद्भूताः गुप्तनरेशाः परम्-भागवत् इत्युपाधिना विभूषिताः सन्तः वैष्णवधर्मं भारतस्य राष्ट्रधर्मेन भूषितवन्तः। विभिन्नैः विरोधिभिः मतवादिभिः भूयोभूयः खण्डितोऽपि वैष्णवधर्मः देशे दृढ एव स्थितः।

वैष्णवधर्मस्य (भागवतधर्मस्य) कालान्तरे संप्रदायेषु विभाजनमपि अजायत स्वाभाविकमिदं वर्तते। तमिलवासिनः सन्तः महात्मानः अनेन धर्मेण अत्यन्तं प्रेरिताः। वस्तुतः भागवतधर्मे एतादृशी जीवनीशक्तिः वर्तते यत् मानवमात्रे रूढायाः आध्यात्मिकबुभुक्षायाः शान्तिं कर्तुं प्रभवति।

अथ भागवतधर्मस्य अपरा शाखा-परम्परा दक्षिणभारते पाञ्चरात्रनाम्ना उद्भूता। अस्याः उद्भवः प्रायेण तृतीयशतके ई॰पू॰ काले मन्यते। पाञ्चरात्रधर्मे मन्यते यत् विश्वस्य बीजं प्रलयरूपेण भगवति वासुदेवे समाहितम्। भगवतः षड्गुणाः सन्ति- ज्ञानम्, ऐश्वर्यम्, वीर्यम्, शक्तिः, बलम् तेजश्च। एतेषु त्रीणि युगलानि सन्ति- ज्ञानं, बलं च ऐश्वर्यं च, शक्तिः तेजशचेति। एतानि युगलानि व्यूहनाम्ना ज्ञायन्ते। ऐते त्रयो व्यूहाः क्रमशः संकर्षणः, प्रद्युम्नः, अनिरुद्धः इति सन्ति। एतेषां त्रयाणां व्यूहानाम् उपरि वासुदेवनामको व्यूहः। एवं चत्वारो व्यूहाः पाञ्चरात्रे स्वीकृताः। सर्वे कृष्णस्य परिवाररूपाः। चतुर्व्यूहसिद्धान्तोऽयं पाञ्चरात्रधर्मस्य लक्षणम्।

केचन जनाः भागवतधर्मं पाञ्चरात्रञ्च एकमेव मन्यन्ते। किन्तु एषा स्थितिः नास्ति। भाष्यकारः शंकराचार्यः यदा व्यूहसिद्धान्तस्य खण्डनं करोति तदा नेदं खण्डनं भागवतधर्मस्य, अपितु पाञ्चरात्रस्य एव मन्तव्यम्।

ऋग्वेदस्य पुरुषसूक्ते एव भागवतधर्मस्य पाञ्चारात्रस्य च उद्गमः वर्तते। किञ्च शतपथब्राह्मणे (13.6.1.1) प्रतिपादितं यत् पुरुषसूक्तस्य साक्षात्कर्ता नारायणऋषिः पाञ्चरात्रनामकं यज्ञमनुष्ठितवान्। तेन च सर्वोच्चसत्तां लब्धवान्। एवम् आराध्याराधकयोः एकीभावस्य यः दृष्टान्तः विष्णुकृष्णरूपेण लभ्यते स एव नारायणऋषिः विष्णोश्च उदाहरणे प्राप्यते।

भागवतधर्मः भगवन्तं कृष्णं परमेश्वरं मन्यते किन्तु पाञ्चारात्रमते नारायणो विष्णुः परमेश्वरः इति गृह्यते।

वैष्णवधर्मस्य इमे शाखे इदम्प्रथमतया तैत्तिरीयारण्यके परस्परम् एकीभूते लभ्येते। तत्र कश्चन गायत्रीमन्त्रः निर्दिष्टः यत्र नारायणो वासुदेवश्च उभौ विष्णुरूपौ गृहीतौ-

**नारायणाय विद्महे, वासुदेवाय धीमहि।**

**तन्नो विष्णुः प्रचोदयात्॥**[6]

अनेन प्रतीयते यत् एतस्य आरण्यकस्य काले भागवत–पाञ्चरात्रधर्मौ किञ्चित्कालं यावत् वैष्णवधर्मस्य सामान्यधारायां परस्परं संघटितौ बभूवतुः। पाञ्चरात्रमतस्य उद्भवविषये मतविशेषः ईश्वरसंहितायां लभ्यते। तदनुसारेण शुक्लयजुर्वेदस्य काण्वशाखायाः पाञ्चरात्रः उद्गतः। तत्र एकः मन्त्रः लभ्यते –

**वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।**

**तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय।।**[7]

अत्र मोक्षस्य एकः एव मार्गः परमेश्वरस्य ज्ञानमात्रं वर्तते। ईश्वरसंहिता ज्ञापयति यत् नारायणऋषेः पाञ्चरात्रमतस्य दृढः आधारः वैदिकसाहित्ये एव वर्तते। महाभारते पाञ्चरात्रमतस्य उद्गमः निर्दिष्टः। शान्तिपर्वणि (339.11–12) निरूपितं यत् चतुर्णां वेदानां सांख्ययोगस्य च समावेशेन नारायणीयोपनिषद् एव पाञ्चरात्रं कथ्यते। अपि च नारदपाञ्चरात्रानुसारेण अस्मिन् मते पञ्चविषयाणां रात्रं ज्ञानं समाविष्टमस्ति। एते विषयाः सन्ति – क्रमः, मुक्तिः, भोगः, योगः, संसारश्च। अतएव पञ्चरात्रं पाञ्चरात्रं वा मतमिदं कथ्यते। अपरत्र शतपथब्राह्मणे (13.6.1) प्रतिपादितं यत् पञ्चसु रात्रिषु अस्य धर्मस्य व्याख्या कृता असीत् इति। (8)

वस्तुतः पाञ्चरात्रमतं भागवत्धर्मादनन्तरमेव विकसितम्।(9) भागवते नारायणीये श्लोकोऽयं लभ्यते–

**साख्यं योगः पाञ्चरात्रं वेदारण्यकमेव च।**

**ज्ञानान्येतानि ब्रह्मर्षे लोकेषु प्रचयन्ति च।।**[10]

एतस्य नारायणीयस्य विकासात् पूर्वमेव भागवतधर्मः प्रचलितः। भगवद्गीता महाभारतस्य तादृशः अंशः वर्तते यत्र कृष्णस्य वासुदेवस्य अदेशरूपेण भागवतधर्मस्य प्रथमः प्रकाशो जातः। अपरत्र नारायणीयं तु पाञ्चरात्रमतस्य प्रतिनिधिः।

निष्कर्षतः अद्यत्वे विद्वांसः विचारयन्ति यत् भागवतधर्मे पाञ्चरात्रगते च निम्नांकितेषु विषयेषु मतभेदो वर्तते–

1. छन्दोग्योपनिषदः कृष्णवासुदेवेन संस्थापितः भागवतधर्मः वैदिकपरम्पराम् आश्रयते। अपरत्र पाञ्चरात्रमतं वैदिकपरम्परातः न निर्गतं वर्तते।
2. भागवतधर्मः गीतायां प्रतिपादितः यत्र चातुर्वर्ण्यव्यवस्थायां विश्वासो वर्तते। पाञ्चरात्रमते चातुर्वर्ण्यव्यवस्थायाः उपेक्षा वरिवर्ति।
3. गीतायां प्रतिपादितो भागवतधर्मः धर्मस्य विषये धर्मसूत्राणि आश्रयते यानि च वैदिकानि सन्ति। अपरत्र पाञ्चरात्रधर्मे एतदर्थमेव स्वकीयानां संहिताग्रन्थानां स्वतन्त्रः विकासः कृतः।
4. उभयोः मतयोः मन्त्रौ पृथक्–पृथक् स्तः। भागवतधर्मे मन्त्रोवर्तते – **ॐ नमो भगवते वासुदेवाय।** अपरत्र पाञ्चरात्रमते मन्त्रो वर्तते **ॐ नमो नारायणाय।**
5. भागवतधर्मे अवतारसिद्धान्तः प्रमुखः। पाञ्चरात्रमते चर्तुव्यूहसिद्धान्तः एव मन्यते। एते व्यूहाः वासुदेवः, संकर्षणः प्रद्युम्नः, अनिरुद्धश्च।
6. भागवतधर्मे शिवस्यापि देवेषु स्थानं वर्तते। किन्तु पाञ्चरात्रमते नारायणविष्णुरेव प्रमुखः।

7. भागवतधर्मः एकतत्त्ववादी वर्तते। किन्तु पाञ्चरात्रं द्वैतवादम् ऊररीकरोति।

सत्स्वपि उक्तेषु मतभेदेषु उभौ धर्मौ परस्परं नानासिद्धान्तान् स्वीकुर्वन्ति। यथा भागवतधर्मः अवतारवादे पाञ्चारात्रस्य व्यूहसिद्धान्तम् आत्मसात् करोति। विष्णुपुराणं पाञ्चरात्रमतेन प्रवर्तमानं लक्ष्मीपूजां विधत्ते। पाञ्चरात्रमते प्रकारान्तरेण अवतारवादः, वासुदेवपूजा, गीतायाः महत्त्वं चेति स्वीकृतम्। नारदेन शण्डिल्येन च स्वं-स्वं भक्तिसूत्रं लिखितम्। तत्र नारदः भागवतधर्मस्य प्रतिनिधिः शाण्डिल्यस्तु पाञ्चरात्रमतस्य। नारदस्य भक्तिसूत्रं भागवत्पुराणेन सुतरां सम्बद्धमस्ति।

इत्थं कथयितुं शक्यते यत् उभयोः वैष्णवधर्मयोः यद्यपि सैद्धान्तिकं वैचारिकं च मतभेदः वर्तते परन्तु द्वयोः आराध्यः देवः समानः वर्तते अतः तयोः परस्परमन्तः प्रभावः परिलक्ष्यते। वस्तुतः कृष्णस्य पूजापद्धतिः उपासना च अनयोः द्वयोः कारणेन संसारे प्रचलिता वर्तते।

**सन्दर्भ ग्रन्थः-**


1. अष्टाध्यायी - 4.3.98
2. अष्टाध्यायी - 7.1.1
3. शतपथब्रह्मणम् - 13.5.4.21
4. ऐतरेयब्रह्मणम्-8.3.14
5. S. Bhattacharya - The Philosophy of Srimad Bhagavet Vol-2, Intro. P..9
6. तैत्तिरीयम् आरण्यकम् - 10.1.6
7. वाजसनेयीसंहिता - 31.18, श्वेताश्वतरोपनिषद् -3.8
8. हिन्दी साहित्यकोश : खण्ड-1 पृ. 582
9. Bhattacharya Philosophy of Bhagavata, vol-1, Intro P-12
10. शान्तिपर्व- 349.1